धीयानो विवर्जयेत्" इति मनुना प्रदर्शितोऽनध्यायभेदः अनध्यायशब्दे १४६पृ० दृश्यम् ।

**नित्यानित्यवस्तुविवेक** पु० नित्यञ्च अनित्यञ्च नित्याऽनित्ये ते च ते वस्तुनी च नित्यानित्यवस्तुनी नित्यानित्यवस्तुनोर्विवेकः पृथगात्मता । ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचने । "ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपो विनिश्चयः । सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः" शब्दार्थचि० धृतवाक्यम् । अयञ्च ब्रह्मविद्यायाम् अधिकारप्रयोजकः ।

**नित्यानित्यसंयोगविरोध** पु० नित्यत्वस्यानित्यत्वस्य एकत्र संयोगे सम्बन्धे विरोधः । एकत्र धर्मिणि नित्यत्वस्यानित्यत्वस्य च सम्बन्धरूपे भावाभावयोरेकत्र योगरूपे विरोधे । संयोगपृथक्त्वन्यायविषयातिरिक्त एवास्य विरोधस्य दूषकतेत्याकारे दृश्यम् ।

**नित्याभियुक्त** त्रि० नित्यमभि समन्तात् युक्तः योगे व्यापृतः । देहयात्रामात्रार्थं प्रयतमाने इतरत्यागासक्ते योगिनि

**निद** न० निदि—क वा० नलोपः । १विषे शब्दच० २निन्दके त्रि० "अर्च्चन् निदाया विश्वेभिरग्निम्" ऋ० ६।१२।६ "निदाया निन्दित्र्याः" भा० । [पुंस्त्री० शब्दच० ।

**निदद्रु** त्रि० निहत्तो दद्रुरस्य प्रा०ब० । १दद्रुरहिते २मनुष्ये

**निदर्शन** न०नि+दृश—ल्युट् । १उदाहरणे दृष्टान्ते "आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितम् । घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनमिति" । यदा मन्दबुद्धिप्रतिपिपादयिषया श्रुत्यात्मनो जातिरुच्यते जीवादीनां तदा जाताबुपगम्यमानायामेतन्निदर्शनं दृष्टान्तो यथोदितं आकाशवदित्यादीनि भाष्यम्" शब्दार्थचि० । २अर्थालङ्कारभेदे स्त्री टाप् । अर्थालङ्कारशब्दे ३९९पृ०दृश्यम् ।

**निदाघ** पु० नितरां दह्यतेऽत्र नि+दह—आधारे घञ् न्यङ्क्वादि० कुत्वम् । १उष्णे २घर्मे ३घर्मकाले ज्यैष्ठाषाढमासयोः ४घर्मजले च मेदि० । ऋतुसंहारे १म सर्गे निदाघकाले वर्ण्याः पदार्था भङ्ग्या प्रदर्शितास्तत्रैव दृश्याः । पुलस्त्यपुत्रे ऋभुपत्नीजाते ५ऋषिभेदे पु० ।

**निदाघकर** पु० निदाघ उष्णः करः अस्य । १सूर्य्ये हारा० निदाघधामादयोऽप्यत्र "निदाघधामानमिवाधिदीधितिम्" माघः । २अर्कवृक्षे च

**निदाघकाल** पु० निदाघस्य कालः । १ग्रीष्मर्त्तौ ज्यैष्ठाषाढमासयोः "दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये !" ऋतुसं० ।

**निदातृ** त्रि० नि+दो—तृच् । निरोधके "चरन्वत्सो रुशन्निह निदातारम्" ऋ० ८।७२।५ "निदातारं निरोधकम्" भा० ।

**निदान** न०नितरामसाधारणतया दयते कार्यम् नि+देङ् पालने ल्यु । १आदिकारणे अमरः २कारणमात्रे ३वत्सदामनि मेदि० नि+दो ल्युट् निरुक्त दानम् प्रा०स० ४कारणक्षये च मेदि० नि+दै शुद्धौ भावे ल्युट् । ५शुद्धौ हेमच० ६रोगनिर्णये विश्वः ७रोगहेतौ । "निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् । निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः । निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते" इति माधवकरः सुश्रुते निदानप्रकरणे तद्भेदादिकं दृश्यम् । "निदानमिक्ष्वाकुकुलस्य सन्ततेः" रघुः ।

**निदिग्ध** त्रि० नि+दिह—क्त । १उपचिते २लेपनादिना वर्द्धिते च ३एलायां स्त्री शब्दच० । ततः संज्ञायां कन् कापि अत इत्त्वम् । निदिग्धिका कण्टकारिकायां स्त्री अमरः ।

**निदिग्धिकादिक्काथ** पु० चक्रदत्तोक्ते क्काथभेदे "निदिग्धिकानागरकामृतानां क्वाथं पिबेन्मिश्रितपिप्पलीकम् । जीर्णज्वरारोचककासशूलश्वासाग्निमान्द्यार्द्दितपीनसेषु । हन्त्यूर्ध्वगामयं प्रायः सायन्तेनोपयुज्यते"

**निदिध्यास** पु० नि+ध्या—सन्—भावे घञ् । श्रवणमननज्ञातस्य एकतानताश्रये निरन्तरचिन्तने । भावे ल्युट् निदिध्यासन तत्रार्थे न० तल्लक्षणादि यथा "निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्मुखात् । तन्निदिध्यासनं प्रोक्तं तच्चैकाग्र्येण लभ्यते । अनात्मन्यरुचिश्चित्ते रुचिश्चात्मनि चेद्भवेत् । पुण्यपुञ्जेन शुद्धं तच्चित्तमैकाग्र्यमर्हति" । विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुनि २सजातीयप्रत्ययप्रवाहे । विजातीयप्रत्ययानन्तरितेन सजातीयप्रत्ययप्रवाहेण ३श्रवणमननफलभूतेनात्मचिन्तने । निदिध्यासनं च विचारविशेषात्मकम् । स च विचारविशेषोध्यानात्मा तद्ध्यानरूपं निदिध्यासनम् । "ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् । एकतानत्वमेतद्धि निदिध्यासनमुच्यते" । ताभ्यां श्रवणमननाभ्याम् । ४अपरायत्तबोधे । "अपरायत्तबोधो हि निदिध्यासनमुच्यते" इति वार्त्तिकोक्तेः "तस्य वेदान्तवेद्यस्य निदिध्यासनतो विना" काशीख०३०अ० । "श्रुते शतगुणं विद्यात् मननं मननादपि । निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्" विवेकचू० ।